**CBSE कक्षा - 9 संस्कृत**
**एनसीईआरटी प्रश्न-उत्तर**
**पाठः - 5 सूक्तिमौक्तिकम्**

**अभ्यासः**

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**
   i. **यत्नेन किं रक्षेत् वित्तं वृत्तं वा?**
   ii. **अस्माभिः (किं न समाचरेत्) कीदृशम् आचरणं न कर्त्तव्यम्?**
   iii. **जन्तवः केन विधिना तुष्यन्ति?**
   iv. **पुरुषैः किमर्थं प्रयत्नः कर्त्तव्यः?**
   v. **सज्जनानां मैत्री कीदृशी भवति?**
   vi. **सरोवराणां हानिः कदा भवति?**
   vii. **नद्याः जलं कदा अपेयं भवति?**

   **उत्तराणि-**
   i. यत्नेन वृत्तं रक्षेत्।
   ii. अस्माभिः आत्मनः प्रतिकूलं आचरणं परैः सह न कर्त्तव्यम्।
   iii. जन्तवः प्रियवाक्यप्रदानेन तुष्यन्ति।
   iv. पुरुषैः गुणेषु प्रयत्नः कर्त्तव्यः।
   v. सज्जनानां मैत्री पुरा लघ्वी पश्चात् च वृद्धिमती भवति।
   vi. यदा सरोवराणां मरालैः सह विप्रयोगः भवति तदा तेषां हानिः भवति।
   vii. नद्याः जलं समुद्रम् आसाद्य अपेयं भवति।

2. **'क' स्तम्भे विशेषणानि 'ख' स्तम्भे च विशेष्याणि दत्तानि, तानि यथोचितं योजयत-**

| ‘क’ स्तम्भः | ‘ख’ स्तम्भः |
|---|---|
| आस्वाद्यतोयाः | खलानां मैत्री |
| गुणयुक्तः | सज्जनानां मैत्री |
| दिनस्य पूर्वार्द्धभिन्ना | नद्यः |
| दिनस्य परार्द्धभिन्ना | दरिद्रः |

**उत्तराणि-**

| ‘क’ स्तम्भः | ‘ख’ स्तम्भः |
|---|---|
| आस्वाद्यतोयाः | नद्यः |

| गुणयुक्तः | दरिद्रः |
|---|---|
| दिनस्य पूर्वार्द्धभिन्ना | खलानां मैत्री |
| दिनस्य परार्द्धभिन्ना | सज्जनानां मैत्री |

3. **अधोलिखितयोः श्लोकद्वयोः आशयं हिन्दीभाषया आङ्ग्लभाषया वा लिखत-**
   - I. **आरम्भगुर्वी क्षयिणी क्रमेण**
     **लघ्वी पुरा वृद्धिमती च पश्चात्।**
     **दिनस्य पूर्वार्द्धपरार्द्धभिन्ना**
     **छायेव मैत्री खुलसज्जनानाम्।।**
   - II. **प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।**
     **तस्मात्तदेव वक्तव्यं वचने का दरिद्रता।।**

   **उत्तराणि-**
   - I. आशय यह है कि जैसे दोपहर से पूर्व की छाया पहले तो लम्बी होती है, फिर धीरे-धीरे घटती जाती है, उसी प्रकार दुष्ट आदमी की मित्रता पहले तो बहुत प्रगाढ़ होती है, परन्तु फिर क्रमशः धीरे-धीरे कम होती जाती है। इसके विपरीत जैसे दोपहर के बाद की छाया पहले तो छोटी होती है, फिर धीरे-धीरे लम्बी होती जाती है, उसी प्रकार सज्जन व्यक्ति की मित्रता पहले सीमित होती है, परन्तु बाद में प्रगाढ़ होती जाती है। इस दृष्टान्त को दृष्टिगत रखते हुए हमें दुष्टों और सज्जनों की मित्रता में अन्तर समझते हुए सज्जनों से मित्रता करनी चाहिए।
   - II. आशय यह है कि यदि हम सभी प्राणियों को खुश रखना चाहते हैं तो हमें हमेशा प्रिय बोलना चाहिए। मीठे वचन बोलने से कोई गरीबी नहीं आती।

4. **अधोलिखितपदेभ्यः भिन्नप्रकृतिकं पदं चित्वा लिखत-**
   - i. **वक्तव्यम्, कर्त्तव्यम्, सर्वस्वम्, हन्तव्यम्।**
   - ii. **यत्नेन, वचने, प्रियवाक्यप्रदानेन, मरालेन।**
   - iii. **श्रूयताम्, अवधार्यताम्, धनवताम्, क्षम्यताम्।**
   - iv. **जन्तवः, नद्यः, विभूतयः, परितः।**

   **उत्तराणि-**
   - i. सर्वस्वम्
   - ii. वचने
   - iii. धनवताम्
   - iv. परितः

5. **स्थूलपदान्यधिकृत्य प्रश्नवाक्यनिर्माणं कुरुत-**
   - i. **<u>वृत्ततः</u> क्षीणः हतः भवति।**
   - ii. **<u>धर्मसर्वस्वं</u> श्रुत्वा अवधार्यताम्।**
   - iii. **<u>वृक्षाः</u> फलं न खादन्ति।**

iv. **<u>खलानाम्</u> मैत्री आरम्भगुर्वी भवति।**

**उत्तराणि-**

i. <u>कस्मात्</u> क्षीणः हतः भवति।

ii. <u>किम्</u> श्रुत्वा अवधार्यताम्।

iii. <u>के</u> फलं न खादन्ति।

iv. <u>केषां</u> मैत्री आरम्भगुर्वी भवति।

6. **अधोलिखितानि वाक्यानि लोट्लकारे परिवर्तयत-**

**यथा- सः पाठं पठति।** - <u>सः पाठं पठतु।</u>

i. **नद्यः आस्वाद्यतोयाः सन्ति। -** ______________

ii. **सः सदैव प्रियवाक्यं वदति। -** ______________

iii. **त्वं परेषां प्रतिकूलानि न समाचरसि। -** ______________

iv. **ते वृत्तं यत्नेन संरक्षन्ति। -** ______________

v. **अहं परोपकाराय कार्यं करोमि। -** ______________

**उत्तर-**

i. नद्यः आस्वाद्यतोयाः सन्तु।

ii. सः सदैव प्रियवाक्यं वदतु।

iii. त्वं परेषां प्रतिकूलानि न समाचर।

iv. ते वृत्तं यत्नेन संरक्षन्तु।

v. अहं परोपकाराय कार्यं करवाणि।

7. **उदाहरणमनुसृत्य कोष्ठकेषु दत्तेषु शब्देषु उचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-**

**यथा-** तेषां <u>मरालैः</u> सह विप्रयोगः भवति। (मराल)

i. __________ **सह छात्रः शोधकार्यं करोति। (अध्यापक)**

ii. __________ **सह पुत्रः आपणं गतवान्। (पितृ)**

iii. **किं त्वम्** __________ **सह मन्दिरं गच्छसि? (मुनि)**

iv. **बालः** __________ **सह खेलितुं गच्छति। (मित्र)**

**उत्तर-**

i. अध्यापकेन

ii. पिता

iii. मुनिना

iv. मित्रेण